# १. श्रीमन्न्यायसुधा (अनुव्याख्यान टीका)

आदि श्लोक तथा अंत्यश्लोका – अध्याय १

श्रियःपत्ये नित्यागणितगुणमाणिक्यविशद–
प्रभाजालोल्लासोपहतसकलावद्यतमसे ।
जगज्जन्मस्थेमप्रलयरचनाशीलवपुषे
नमोऽशेषाम्नायस्मृतिहृदयदीप्ताय हरये ॥ १ ॥

वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता ।
ध्रियतां सदये हृदये कमलामहिलेन पूरुषेण ।

अध्याय २

यत्पदं वेदसंवेद्यं कटाक्षेणापि वीक्षितुम्।
न क्षमंते विमतयस्तमुपासे श्रियःपतिम् ।

न वैदुष्यभ्रांत्या न च वचनचातुर्यकुधिया
न मात्सर्यावेशान्न च चपलतादोषवशतः ।
परं श्रद्धाजाड्यादकृषि कृतिराचार्यवचसि
स्खलन्नप्येतस्माज्जगति न हि निंद्योऽस्मि विदुषाम्।

अध्याय ३

कुपिताहिफणच्चायासमीकृत्यापरं सुखम् ।
सेवंते यत्पदं द्चीरास्तं भजे वल्लभं श्रियः ।

अनुव्याख्यामृतांभोधेः समुत्पन्नाऽतिनिर्मला।
इयं न्यायसुधा भौमैर्विबुधैः सेव्यतां सदा ।

अध्याय ४
यदीयचरणांभोजच्छायामाश्रित्य निवृताः ।
नंदंति संततं मुक्ताः संश्रये तं श्रियःपतिम् ।

इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते–
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ।
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ
चतुर्थेऽध्यायेऽस्मिन् चरमचरणः पर्यवसितः ।
-------------------

## २. तत्त्वप्रकाशिका (ब्रह्मसूत्रभाष्य टीका)

आदिश्लोक –
शुद्धानंदोरुसंविद्द्युतिबलबहुलौदार्यवीर्यादिदेहं
चिंतासंतापलेपोद्भवमृतिमुखराशेषदोषातिदूरम् ।
सद्भिर्वैराग्यभक्तिश्रुतिमतिनियतध्यानजज्ञानयोगा–
द्गम्यं वंदे मुकुंदाभिधममलमलं ब्रह्मवेदांतवेद्यम्।

अंत्यश्लोक –
उत्पत्तिस्थितिसंहृतिप्रभृतयो भावा भवंत्याज्ञया
पद्मापद्मभवादिसर्वजगतो व्यस्ताः समस्ताः सदा ।
यस्यागण्यगुणाकरस्य करुणापीयूषवारांनिधेः
सोऽयं दूरनिरस्तदोषनिकरः प्रीतोऽस्तु नारायणः ।

अगाधबोधैर्विवृतातिभावभाष्यानुवादेन न मेऽपराधः ।
न हींदिराराध्यपदो मुकुंदोदूर्वांकुरैर्मंदधनैरपूज्यः ।
मध्वदुग्दाब्धिसंभूतभाष्येंदूदितकौमुदी।
भूयात् सत्कुमुदानंददात्री तत्त्वप्रकाशिका ।
------------------------

## ३. न्यायविवरण टीका

जयंति जानकीभर्तुश्चरणांभोजरेणवः ।
नमत्सुरकिरीटस्थान् ये मणीनतिशेरते ।
दुरंतदुरितध्वांतविध्वंसनपटीयसे ।
बादरायणसंज्ञाय परस्मै महसे नमः ।
नमामि श्रीमदानंदतीर्थाचार्यं परं गुरुं ।
यस्य वाणी कृपाणीयं निकृंतति भवाटवीं ।
प्रणम्य चरणांभोजे गुरूणां तत्कृपाबलात् ।
सन्न्यायविवृतिव्याख्यां  करिष्यामि यथामति ।
----------------------

# ४. प्रमेयदीपिका (गीताभाष्य टीका)

आदि श्लोक –

गुणगणनिलयं पतिं रमाया जगदघदहनं च वासवीसूनुम् ।
मुनिकुलतिलकं च पूर्णबोध गुरुमपि परमं गुरुं च मे वंदे ।
आनंदतीर्थभगवत्पादाचार्यविनिर्मितं ।
व्याख्यास्ये भगवद्गीताभाष्यं तत्करुणाबलात् ।

अंत्य श्लोक –

करतलमिलितामलकमिव प्रभुणा येनेदमवगतं विश्वं ।
स जयति जनकसुतायाः कांतः श्रीरघुनंदनो देवः ।
नमामि व्यासदासस्य पूर्णबुद्धेः पदांबुजे ।
नतामरशिरोरत्नराजनीराजिते सदा ।
अक्षोभ्यतीर्थगुरुणा शुकवच्छिक्षितस्य मे ।
वचोभिरमृतप्रायैः प्रीयंतां सततं बुधाः ।

--------------------

# ५. न्यायदीपिका (गीता तात्पर्य टीका)

आदिश्लोक

इंदिरावदनांभोजराजहंसाय विष्णवे ।
अमंदानंदसंदोहसुंदराकृतये नमः ।
धर्मविज्ञानवैराग्यपरमैश्वर्यशालिनः ।

आनंदतीर्थभगवत्पादान् वंदे निरंतरं ।
स पद्मनाभतीर्थार्कगोगणो स्तु दृशे मम ।
न तत्त्वमार्गे गमनं विना यदुपजीवनं ।
प्रणम्य चरणद्वंद्वं गुरूणां तत्कृपाबलात् ।
व्याकरिष्ये यथाबोधं गीतातात्पर्यनिर्णयम् ।

अंत्यश्लोक
श्रीमदानंदतीर्थार्यहृदयामलमंदिरः ।
इंदिरारमणः प्रीतिं यातु दीनदयापरः ।

----------------

## ६. संबंधदीपिका (ऋग्भाष्य टीका)

आदिश्लोक –
नारायणाभिधं ज्योतिः प्रत्यूहध्वांतशांतिकृत् ।
कमलाकमलानंदमंतःस्वांतमुपास्महे ।
ऋचां पदान्युपादाय तेषां भाष्यपदैः सह ।
कुर्मः संवादितामात्रं यथाधीतं यथामति ।

अंत्यश्लोक –
देवताः कंचुकायंते वेदो बंदिजनायते ।
यस्य तस्मिन् रमानाथे सुधृढा प्रीतिरस्तु मे ।१।

ये भवंति जनाः संतः प्रज्ञासौजन्यशालिनः ।
तोषं ते मत्कृतौ यांति किमन्यैः पशुसन्निभैः ।२।
शब्दानां साधनं सम्यक् तत्प्रयोजनकीर्तनम् ।
नाकार्षं विस्तरभयादिह तत् क्षमतां बुधैः ।३।
---------------------

## ७. ईशावास्यभाष्य टीका

आदिश्लोक –
यज्ञं यज्ञभुजं प्राज्ञं पूर्णप्रज्ञमुनीश्वरम् ।
मनोज्ञगुणमासेवे सुज्ञान्मदमहर्निशम् । १ ।
श्रीमच्छ्रीवदनांभोजगतसौंदर्यसौरभम् ।
लिहद्भ्यां लोचनालिभ्यां भगवान् पातु नो हरिः । २ ।

अंत्यश्लोक
कमलावदनांभोजराजहंसाय विष्णवे ।
नमो जगज्जनिस्थेमहेतवे परमात्मने ।
---------------------

## ८. षट्प्रश्नोपनिषद्भाष्य टीका –

आदि श्लोक –
पांतु नः पद्मनाभस्य श्रीपदांबुजरेणवः ।
कमलाकबरीभारसुरभीकरणोद्यताः ।

अंत्य श्लोक –

वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता ।
ध्रियतां सदये हृदये कमलामहिलेन पूरुषेण ।

------------------

## ९. न्यायकल्पलता (प्रमाणलक्षण टीका)

आदिश्लोक –

प्रणम्यगण्यकल्याणगुणाब्धिं पुरुषोत्तमम् ।
पूर्णबोधानपि गुरून् व्याकुर्मे मानलक्षणम् ।

अंत्यश्लोक –

अमरा भ्रमरायंते कमला वरटायते ।
यत्पादांभोरुहद्वंद्वे वंदे तं पुरुषोत्तमम् ।

---------------------

## १०. मायावाद खंडन टीका –

आदि श्लोक –

नरसिंहमसह्योरुप्रत्यूहतिमिरापहम् ।
प्रणिपत्य व्याकरिष्ये मायावादस्य खंडनम् ।

अंत्यश्लोक –

वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता ।
ध्रियतां सदये हृदये कमलामहिलेन पूरुशेण

---------------------

## ११. कथालक्षण टीका –

आदिश्लोका –

श्रियः कमितुरानम्य चरणांबुरुहद्वयम् ।
यथाबोधं विधास्यामः कथालक्षणपंचिकाम्।

अंत्य श्लोक –

श्रीमदानंदतीर्थार्य हृदयामलमंदिरा ।
इंदिरार्चितपादाब्जा देवता पातु नः सदा ।

-------------------------------

## १२. प्रपंचमिथ्यात्वानुमानखंडन टीका

आदिश्लोक

नत्वा विश्वोदयस्थेमलयहेतुं पतिं श्रियः ।
कुर्मः प्रपंचमिथ्यात्वमानखंडनपंचिकाम् ।

अंत्यश्लोक

उत्पत्तिस्थितिभंगम् विश्वं यस्मात् प्रपद्यते पुरुषात् ।
स जयति जगतामंतर्यामी स्वामी रमानाथः ।

## १३. उपाधिखंडन टीका

आदिश्लोक

रमया रमणं नत्वा गुणमाणिक्यमंडनम् ।
तत्त्वप्रकाशिकाव्याख्यां करिष्यामो यथामति ।

अंत्यश्लोक

सदासुरशिरोरत्नप्रभामोषि नखत्विषि ।
कमलाकमितुः पादयुगले रतिरस्तु मे ।

-------------

## १४. कर्मनिर्णय टीका –

आदिश्लोक

ब्राह्मणोपनिषन्मंत्रभेदा वेदगिरोऽखिलाः ।
यत्क्रीडाभूमयस्तस्मै परस्मै ब्रह्मणे नमः ।

प्रणम्य श्रीमदानंदतीर्थार्यपदपंकजे ।
गुरूणां च यथाबोधं व्याकुर्वे कर्मनिर्णयम् ।

अंत्यश्लोक

यत्संबंधेन कर्माणि फलवंति भवंति हि ।
यः सर्वकर्मणां कर्ता तस्मै भगवते नमः ॥

-----------------

## १५. तत्त्वसंख्यान टीका

आदिश्लोक

लक्ष्मीपतेः पदांभोजयुगं नत्वा गुरोरपि ।
करिष्ये तत्त्वसंख्यानव्याख्यानं नातिविस्तरम् ।

अंत्यश्लोक

पद्मापद्मासनानंतप्रभृतीदं यदिच्चया ।
सत्तादि लभते देवः प्रीयतां श्रीपतिः स मे ।

------------------------

## १६. तत्त्वविवेक टीका

आदिश्लोक

प्रणम्य रमणं लक्ष्म्याः पूर्णबोधगुरूनपि ।
व्याख्यां तत्त्वविवेकस्य करिष्यामो यथामति ।

अंत्यश्लोक

करतलकलितामलकप्रख्यं यस्याखिलं विश्वम् ।
कमलापरिवृढममलं वंदे तं वंद्यपादाब्जम् ।

---------------------

## १७. तत्त्वोद्योत टीका

आदिश्लोक

विश्वोत्पत्तिस्थितिध्वंसकारणं रमणं श्रियः ।
अभिवंद्य यथाबोधं तत्त्वोद्योतं विवृण्महे ।

अंत्यश्लोक

श्रीमदानंदतीर्थार्यहृदयांभोजमंदिरः ।
कमलाश्लेषरसिकः पीयतां नः परः पुमान् ।

-------------------------------

## १८. विष्णुतत्त्वविनिर्णय टीका

आदिश्लोक–

विश्वस्योदयमातनोति तदनु त्राणं विधत्ते पुनः ।
सौख्याप्तीतरहानिसाधनमलं वक्ति श्रुतीर्व्यंजयन् ।
स्वापं प्रापयति श्रमापहृतये कल्पावसाने च य–
स्तं देवं पितरं पतिं गुरुतमं वंदे रमावल्लभम् । १ ।

अंत्यश्लोक–

आनंदतीर्थभगवद्वचसां विशिष्ट–
व्याख्यानकर्मणि सुरा अधिकारिणो  त्र ।
यन्मादृशो पि यतते तदतीव हास्यं
किं नाम भक्तिविवशस्य विभूषणं तत् ।

## १९. प्रमाणपद्धति –

आदिश्लोक
प्रणम्य चरणांभोजयुगलं कमलापते : ।
प्रमाणपद्धतिं कुर्मो बालानां बोधसिद्धये ।

अंत्यश्लोक –
जयतीर्थमुनींद्रेण बालबोधाय निर्मिता ।
प्रमाणपद्धतिर्भूयात् प्रीत्यैः माधवमध्वयोः ।

---------------------------------

## २०. वादावली

आदि श्लोक
नमोऽगणितकल्याणगुणपूर्णाय विष्णवे ।
सत्याशेषजगज्जन्मपूर्वकर्त्रे मुरद्विषे ।

अंत्यश्लोक
जयतीर्थमुनींद्रेण बालबोधाय निर्मितम् ।
वाग्मुखाद्वांग्मुखं भूयात् प्रीत्यै माधवमध्वयोः ।

-----------------

# २१. पद्यमाला

आदिश्लोक

प्रणम्य श्रीपतिं सर्वान् गुरूंश्चाथ प्रवच्म्यहम् ।
यथामति हरेः पूजाविधिं वैष्णवसंमतम् ।

अंत्यश्लोक –
पद्यपाठे मनुष्याणाम् श्रमो नाति भवेदिति ।
तंत्रसारोक्तपूजायाः पद्यमालेयमीरिता ।
अनेन भगवान् विष्णुः प्रीतो भवतु सर्वदा ।
प्रमादतो निरोधाद्वा हरेः पूजा भवेन्न चेत् ।
पठनात् पद्यमालाया नरः पूजाफलं लभेत् ।